**अतुल्य** त्रि० न तुल्यः । असदृशे असमाने "अतुल्यमहसा-सार्द्धं रामेण मम विग्रह" इति भट्टिः ।

**अतुष** त्रि० नास्ति तुषोऽस्य । अवघातादिना निस्तुषीकृते धान्यादौ "अतुषानिव यवान् कृत्वेति" ।

**अतुहिनरश्मि** पु० न तुहिनः अहिम उष्णो रश्मिरस्य । उष्णरश्मौ सूर्य्ये । न०त० । उष्णरश्मौ पु० ।

**अतूतुजि** पु० न+तुज-कि द्वित्वदीर्घौ । अदातरि । "अतू-तुजिं चित् तूतुजिरशिश्नदिति" ऋ० तूतुजिर्दातेति भा० ।

**अतूर्त्त** त्रि० न तूर्य्यते तुरी हिंसायाम् क्त ईदित्त्वादिट् न । अहिंसिते । "अतूर्त्तः राजा श्रव इच्छमान इति ऋ० । अतूर्त्तः अहिंसित इति भा० ।

**अतृणाद** त्रि० न तृणमत्ति अद-अण्-उप० न०त० । तृणाभक्षके दुग्धमात्रपोष्ये गवादिवत्से । "अथ वत्सं जातमाहुरतृणादमिति" वेदः । [मनर्हे पर्वते ।

**अतृदिल** पु० न तृद्यते बध्यते तृद-किलच् न०त० । हन्तु-

**अतृप्ति** स्त्री तृप्तिः सन्तोषः अभावार्थे-न०त० । तृप्त्यभावे ब० । तृप्तिरहिते, असन्तोषिणि, लोलुपे च त्रि० ।

**अतेजस्** न० न तेजः विरोधे न०त० । तेजोविरोधिनि तमसि छायायाम् । नास्ति तेजोऽस्य वा न कप् । तेजोरहिते त्रि० कपि । अतितेजस्कोऽप्यत्र त्रि० ।

**अत्क** पु० अतति सततं विकृतिम् अत-कन किच्चस् । शरीरावयवे "स्तरीर्नात्कं व्युतं वसानेति" श्रुतिः । अतति सततं गच्छति । पान्थे त्रि० ।

**अत्तवे** अव्य० अद-तुमर्थे तवेङ् । अत्तुमित्यर्थे "हविषेऽत्तवे इति" यजु० । "अत्तवे हविर्भक्षितुमिति" वेददीपः ।

**अत्ता** स्त्री अतति सततं सम्बध्नाति अत-तक् इडभावः । मातरि, स्त्रियाः-श्वश्र्वाञ्च । स्वार्थे के कापि अत इत्त्वे । अत्तिकाप्यत्र ।

**अत्ति** त्रि० अत्यते सर्व्वदा सम्बध्यते कर्म्मणि क्तिन् । मातरि, ज्येष्ठभगिन्यां, स्त्रियाः-श्वश्र्वाञ्च । स्वार्थे कन् । तत्रैवार्थे ।

**अत्तृ** पु० अद्-तृच् । परमेश्वरे, "अत्ता चराचरग्रहणादिति" शारीरकसूत्रम् तस्य अत्तृत्वञ्च "यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनो मृत्युर्यस्योपसेचनमिति" श्रुतौ सर्व्वभ-क्षकत्वेनोक्तेः । अधिकमदितिशब्दे वक्ष्यते भक्षणकर्त्तृमात्रे त्रि० स्त्रियां ङीप् । "अरक्षितारमत्तारं नृपं विद्या-दधोगतिमिति" भार० ।

**अत्न** न० अतति जयपराजयावत्र अत-न । युद्धे । निरु० ।

**अत्नु** पु० अत-नु । वायौ । सततगन्तरि । पथिके त्रि० । उणा० ।

**अत्य** त्रि० अतति शीघ्रं गच्छति कर्त्तरि यत् । शीघ्रगेऽश्वे, "अश्वोऽस्यत्योऽसि मयोसीति" ता०ब्रा० । "अत्युमत्यं न वाजिनमिति" वेदः ।

**अत्यग्निष्टोम** पु० अतिक्रान्तोऽग्निष्टोममधिकफलदत्वात् अत्या०स० । "अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोडशी राज-पेयोऽतिरात्रोऽप्तोर्याम इति" गवामयनसंस्थयज्ञभेदे ।

**अत्यङ्कुश** पु० अतिक्रान्तोऽङ्कुशं तत्पीड़नमनादृत्य यथेष्टं प्रवृत्त-त्वात् अत्या०स० । अङ्कुशाघातानादरेण यथेच्छं प्रवृत्ते उत्कटे दुर्दान्ते गजे । [अङ्गुलिपरिमाणाधिके ।

**अत्यङ्गुल** त्रि० अतिक्रान्तोऽङ्गुलिं तत्परिमाणम् अच् समा० ।

**अत्यध्व** त्रि० अतिक्रान्तोऽध्वानम् अत्या०स० अच् समा० । अतिक्रान्तपथे प्रा०स० । अतः पूजनार्थत्वान्न समा० । अत्यध्वन् । सुपथि पु० ।

**अत्यन्त** न० अतिक्रान्तोऽन्तं सीमाम् अत्या०स० । अतिशये तद्युक्ते सर्व्वपरिच्छेदातिक्रान्ते त्रि० । अतिक्रमेऽव्ययी० । परिच्छेदातिक्रमे नाशातिक्रमे च अव्य० । "किं वा तवा-त्यन्तवियोगदुःखे" इति रघु० "अत्यन्तहिमोत्तरानिला इति" कुमा० । "सुखमत्यन्तमश्नुते" इति गीता । "शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरमिति" च पुरा० । "अत्यन्ते भवः ठक् आत्यन्तिकः । अत्यन्तभवे वस्तुनि त्रि० । नाशाति-क्रान्ते त्रि० "अत्यन्तं निर्जगद्योमेति" पञ्चदशी ।

**अत्यन्तकोपन** त्रि० अत्यन्तं भृशं कुप्यति अति+कुप-ल्यु । भृशकोपान्विते अतिकोपयुक्ते ।

**अत्यन्तगामिन्** त्रि० अत्यन्तम् अन्तात्ययं अति+अन्त-अत्यये अव्ययीभावः तद्गच्छति गम-कर्त्तरि णिनि । आत्य-न्तिके अतिशयगमनशीले च । स्त्रियामत्यन्तगामिनी ।

**अत्यन्तनिवृत्ति** स्त्री अत्यन्ता निवृत्तिः । स्वप्रतियोगि-जातीयप्रागभावासमानाधिकरणे ध्वंसे । यस्यां सत्यां स्वप्रतियोगिजातीयस्यान्यस्य पुनरुत्पत्तिर्न भवेत् तादृशी निवृत्तिरत्यन्तनिवृत्तिः "अथ त्रिविधदुःखात्यन्तनिवृत्ति-रत्यन्तपुरुषार्थ इति" सांख्यसूत्रम् । सा च मोक्षावस्थाया-मेव, मोक्षे हि विवेकेनाविद्यानिवृत्तौ तत्कार्य्यस्य दुःखादेः सुतरां समूलसमुच्छेद इति तत्र न पुनर्दुःखोत्पादः अतस्तत्र दुःखात्यन्तनिवृत्तिः ।

**अत्यन्तसंयोग** पु० अत्यन्तेन साकल्येन संयोगः संबन्धः व्याप्तिरिति यावत् अन्तमवसानमतिक्रान्तः संयोगो वा । सन्ततसम्बन्धे, व्याप्तौ च । "कालाध्वनोरत्यन्तसंयोग" इति पा० । [वृक्षे राजनि० ।

**अत्यन्तसुकुमार** पु० अत्यन्तं सुकुमार इव । (काङ्नी) कङ्गनी